CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मई-जून २००४ ईसवीयाब्दः ओ३म् R.N.I. Regd. No. UPBIL/1998/1485

ज्वालापुरीय-गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

'भारते भातु भारती'

मुक्तकाञ्जलिः

-डॉ. अनन्तरामिश्रः 'अनन्तः'
गोला गोकर्णनाथ, खीरी-२६२८०२ (उ. प्र.)

(१)

पूजितं दुग्धेन खलु सर्पाचरणमास्ते,
शीलवध्वा अङ्गमुच्छिन्नावरणमास्ते ।
प्रत्ययं सन्धिं विना विग्रहवती भाषा,
साम्प्रतं भ्रातर्विचित्रं व्याकरणमास्ते ॥

(२)

हृदि कुटिलता मृदुवचनमस्मिन् युगे,
छद्मशंसाऽऽर्जवदमनमस्मिन् युगे।
पुस्तकेषु सुकथ्यमस्तु न वास्तु वै,
भव्यमस्ति प्राक्कथनमस्मिन् युगे ॥

(३)

वारिमथनं क्षुद्रपाणौ सर्षपोद्भवनं,
वीचिगणनं भवति पवने ग्रन्थिसंग्रथनम् ।
बोधनं कठिनं शठानां पायसं वक्रं
सिन्धुपानं खड्गमार्गे नग्नपदगमनम् ॥

(४)

ग्रीष्म-तप्ते वपुषि चन्दनं रोचते,
श्रावणस्याम्बरे घनघनं रोचते।
रोचतेऽनवसरे नैव किञ्चित् परं
योग्यकालावधौ सर्वमारोचते ॥

(५)

कुत्सितं कुत्सितं कल्पनीयं कदा ?,
दूषितं दूषितं दर्शनीयं कदा ?।
चन्दनस्यादरो दृश्यते भूतले,
पङ्कजातं शिरसि धारणीयं कदा ? ॥

[शेषांशः २ पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भारतोदयः

संस्कृत-मासिकपत्रम्

वर्षम् - ६४ अङ्कौ - ११,१२

सम्पादकः
डा. हरिगोपालशास्त्री
व्याकरणाचार्यः
एम.ए., पीएच. डी.
राष्ट्रपति-पुरस्कृतः

सह-सम्पादकः
डॉ. केशवप्रसाद उपाध्यायः
साहित्याचार्यः
एम.ए., पीएच. डी.

प्रबन्ध-सम्पादकः
डॉ. अजयकौशिकः
साहित्याचार्यः
एम.ए.,पीएच. डी.

प्रकाशकः
गुरुकुलमहाविद्यालयः ज्वालापुरम्
हरिद्वारम्-२४६४०५ (उत्तराञ्चलम्)

शुल्क-विवरणम्

प्रत्यङ्कम्	-	५/-
वार्षिकम्	-	५०/-
आजीवनम्	-	५००/-

विषयानुक्रमणिका

१.	मुक्तकाञ्जलिः	- डॉ. अनन्तराममिश्रः 'अनन्तः'	१
२.	श्रुति-सुधा	-महर्षिदयानन्दसरस्वती	३
३.	संस्कृतस्य वैशिष्ट्यम्	-डॉ. उदयनाथझा 'अशोकः'	४
४.	जगत् जीवः परमात्मा च	- आचार्यदिगम्बरमहापात्रः	५
५.	भाव-लहरी	- श्री फणिनारायणशर्मा सिग्देलः	६
६.	संस्कृतभाषा साहित्यञ्च (२) (नाममात्रेण परीचयः)	-डा. रामप्रतापतिवारी	८
७.	प्रपिबन्तु चायम्	-अञ्जू रानी	११
८.	पोषिता प्रकृतिः संस्कृतसाहित्ये	-डॉ. शिवकुमारशास्त्री	१२
९.	नदी	-डॉ. हर्षदेवः माधवः	१५
१०.	संस्कृत - समाचाराः	-	१६
	(i) अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्य समापनसमारोहः सम्पन्नः	-	१६
	(ii) गायत्रीमहिमा इति धारावाहिकस्य सान्द्रमुद्रिकायाः लोकार्पणम्	-	१६
	(iii) संस्कृतगौरवेण एव भारतस्य गौरवः	-डॉ. मैठाणी	१७
	(iv) शान्तिकुञ्जे त्रिदिवसीया कार्यशाला सम्पन्ना	-	१७
	(v) संस्कृतशिक्षकप्रशिक्षणवर्गस्य उद्घाटनं सञ्जातम्	-	१८
११.	अखिल भारतीय नवोदित संस्कृत कवि प्रतियोगिता दिल्ली अकादमी दिल्ली सरकार	-डा. श्रीकृष्ण सेमवालः	१९
१२.	भोजनकालिक-जलपाननियमः	-डॉ. व्रजेन्द्रकुमारसिंहदेवः	२०

प्रथमपृष्ठस्य शेषांशः

मुक्तकाञ्जलिः

(६)

नानुकूलं भाग्यमुत्प्रतिकूलमप्यास्ते,
केवलं सौख्यं न दुःख-विमूलमप्यास्ते ।
कथं स्याद् द्वन्द्वं विना भुवि जीवनस्याशा-
पुष्पमेव न वाटिकायां शूलमप्यास्ते ॥

(७)

वञ्चना विकराल-दशना सर्वतः,
वासनेव क्वणित-रसना सर्वतः।
'कैबरे'- नृत्यं समादृतमद्य भुवि,
दृश्यते लज्जा विवसना सर्वतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्वालापुरीय – गुरुकुलमहाविद्यालयस्य सचित्रं मासिकं मुखपत्रम्

भारतोदयः

भविक–भरित–भारतोदयोऽयं भव–विभवोद्भवभावनाभिलाषी।
भगवति भुवि भक्ति–भावभाजां भव–भय–भाव–भरं भ्रियान्नभूमन् ।।
X X X X
निशम्यतां लेख–ललाम–सञ्चय–प्रकाशने येन कृतोऽतिनिश्चयः।
गृहीतसद्धर्मविशेषसंश्रयश्चकास्ति सोऽयं भुवि 'भारतोदयः'।।

वर्षम् - ९४ | ज्येष्ठ-आषाढ २०६१ विक्रमाब्दः ❁ मई-जून २००४ ईसवीयाब्दः | अङ्कौ - ११, १२

श्रुति–सुधा

ओ३म् विश्वे देवासो अप्तुरः सुतमागन्त तूर्णयः ।
उस्रा इव स्वसराणि ॥ – ऋग्वेद १/१/८

पदार्थः –

(विश्वे) समस्ताः । (देवासः) विद्यावन्तः। (अप्तुरः) मनुष्याणामपः प्राणान् तुतुरति विद्यादिबलानि प्राप्नुवन्ति प्रापयन्ति च ते । अयं शीघ्रार्थस्य तुरेः क्विबन्तः प्रयोगः। (सुतम्) अन्तःकरणाभिगतं विज्ञानं कर्तुम् । (आगन्त) आगच्छत । अयं गमेर्लोटो मध्यम-बहुवचने प्रयोगः । 'बहुलं छन्दसि (अ. २/४/७३)' इत्यनेन शपो लुकि कृते 'तप्तनप्तनथनाश्च (अ. ७/१/४५)' इति तबादेश पित्वादनुनासिकलोपाभावः। (तूर्णयः) सर्वत्र विद्यां प्रकाशयितुं त्वरमाणाः । 'त्रिनत्वरा सम्भ्रमे' इत्यस्मात् 'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् (उ. ४/५३)' अत्र नेरनुवर्तनात्तूर्णिरिति सिद्धम् । (उस्रा इव) सूर्य्यकिरणा इव । 'उस्रा इति रश्मिनामसु पठितम् (निघं.१/५)' (स्वसराणि) अहानि । 'स्वसराणीत्यहर्नामसु पठितम्। (निघं.१/९)।' अत्रोपमालङ्कारः ॥८॥

भावार्थः –

ईश्वरेणैतन्मन्त्रेणेयमाज्ञा दत्ता, हे सर्वे विद्वांसो नैव युष्माभिः कदाचिदपि विद्यादिशुभगुण-प्रकाशकरणे विलम्बालस्ये कर्त्तव्ये। यथा दिवसे सर्वे मूर्तिमन्तः पदार्थाः प्रकाशिताः भवन्ति, तथैव युष्माभिरपि सर्वे विद्या-विषयाः सदैव प्रकाशिताः कार्य्या इति ॥८॥

–महर्षिदयानन्दसरस्वती

[ऋग्वेदभाष्यम्, प्रथमो भागः, ४८६ पृष्ठे]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतस्य वैशिष्ट्यम्

-डॉ. उदयनाथझा 'अशोकः'
साहित्यविभागाध्यक्षः
श्रीसदाशिवकेन्द्रियसंस्कृतविद्यापीठम्
पुरी - ७५२००१ (उडीसाप्रदेशः)

'संस्कृतं संस्कृतेर्मूलं तरूणां मूलवत् किल ।
विना मूलं न तरवो मनुजाः संस्कृतं विना ।।'

संस्कृत्याधारिता संस्कार-सम्पन्ना च भाषा संस्कृतभाषा इति। संस्कृतिर्नाम भारतीयसंस्कृतिः, आर्यसंस्कृतिः, सनातनसंस्कृतिः, हिन्दु-संस्कृतिः, देवसंस्कृतिर्वा । संस्कारो हि नाम मलापनयनं गुणाधानञ्चेति किं वा प्रकृतिप्रत्ययादिसंस्कारः । अत्र शुक्लयजुःप्रातिशाख्यस्योक्तसूत्रगतस्य 'आदि' शब्दस्य व्याख्यानं करोति उव्वटः 'आदिशब्देन वर्णागमलोपविकारा गृह्यन्ते ।' अर्थात् यस्याः भाषायाः शब्देषु प्रकृति-प्रत्ययोः विभागः परिलक्षितो भवति, एवञ्च वर्णागम-वर्णलोप - वर्णविकाराणामपि ज्ञानं भवति, एतादृशैश्शब्दैः सम्पन्ना भाषा एव भवति संस्कृत-भाषा । न च सा भाषा या प्राग् विकृतासीत् पश्चात् परिष्कृता जाता, यथानाभिज्ञैः कथ्यते ।

केचिद् वदन्ति संस्कृतमप्रगतिशीला भाषा, कथयन्तु यस्यां भाषायाम् अर्थशास्त्रं पदार्थविज्ञानं खगोलशास्त्रं चिकित्साशास्त्रं वास्तुशास्त्रं कामशास्त्रञ्चेति अत्युपयोगिनां विषयाणां प्रतिपादनं स्यात्, 'तमसो मा ज्योतिर्गमय' आदि तत्त्वज्ञानानि विद्यन्ते, 'वसुधैव कुटुम्बकम्' इति उदात्तभावना स्यात्, सा कथमप्रगतिशीला भवितुमर्हति ? ये च जनाः संस्कृतं मृतभाषां कथयन्ति, वस्तुतस्ते न संस्कृतस्यामृतत्त्वं जानन्ति । या च भाषा पुरातनकालत एव मनुष्याणां जीवनदात्री वर्तते, सा कथं मृता स्यात् ? नहि एतावदेव, अपि तु संस्कृतं लोकभाषा-सम्पर्कभाषापि आसीत् । 'दूराद्धूते च', 'प्रत्यभिवादेऽशूद्रे' इति सूत्राभ्यां प्लुतत्त्वविधानं नितरामस्या व्यावहारिकत्वं प्रमाणयति । महाभाष्ये वयं वैयाकरणसूत्रयोर्मध्ये प्रजातृशब्दमुद्दिश्य संस्कृतगिरि विवादं शृणुमः ।

संस्कृतस्य ग्रीक - लैटिन - स्लावोनिक-जर्मन - क्रोमो- गोको- वैक्ट्रियन -फारसी-हिब्रु-आङ्ग्लादिभाषाभिः गहनतमसम्बन्धोऽस्ति । पारसियानामवेस्ताख्यस्य धर्मग्रन्थस्य वैदिक - संस्कृतेन सह समाना प्रकृतिः परस्परं सामीप्यञ्चापि वर्तते। तत्र संस्कृतभाषायाः 'भवति,तरुणः,असुरः' अवेस्तायां 'बवहति, तउरुन, अहुर' रूपेषु प्रयुक्ताः। संस्कृतस्य 'ददर्श, श्वानः, शिरः' आदिशब्दाः ग्रीकभाषायां,'देर्दोक, क्वान, किरस्' - शब्देषु, संस्कृतस्य 'अहम्,यदि' शब्दादयः फारसीभाषायां 'अदम, यदी' शब्देषु, 'शाप' - शब्दः क्रोमोभाषायां 'शपथ' शब्दे, 'माणिक्य'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

-शब्दः गोकोभाषायां 'मणिकम' शब्दे, 'अस्ति, वित्त, नप्ता' शब्दाः जर्मनभाषायां 'इस्त, विस्सा, निफ्त' - शब्देषु, 'पितर' शब्दः लैटिनभाषायां 'पेटर' रूपे, 'नभस, 'यज्ञ' आदिशब्दाः वैक्ट्रियन -भाषायां 'नमह,यज' आदिशब्देषु प्रयुक्ताः भवन्ति । एवं हि अङ्गंलभाषायाः गो - ग्रासादिशब्दाः संस्कृतभाषायां मूलरूपेषु एव विद्यन्ते, । **यथा - गौः (गम्-डो-गमेर्डोः)** ग्रासः इति। अत एव न संस्कृतं भारतीयभाषाणां जननी, अपि तु संसारस्य सर्वासां ३३९७ भाषाणां जननी वर्ततेऽत्र नैव सन्देहलेशः ।

विश्वस्य सर्वासु भाषासु संस्कृतभाषा एव अतिशयेन वर्तते । यतोऽस्या व्याकरणं सर्वाङ्गपूर्णं, शब्दकोशोऽप्रतिमः, लिपिः वैज्ञानिकी वर्तन्ते । संस्कृतभाषायां यल्लिख्यते तदेव पठ्यते, न **(But, Put) बट, पुटयोः** न वा **(Son, Sun)** सन-सनयोः भेदो दृश्यते। भाषाविज्ञानस्य सम्यज्ज्ञानार्थमपि संस्कृतस्य ज्ञानमनिवार्यम् । भारतीयानां धर्मग्रन्थाः रामायण- पुराणमहाभारतादयः स्मृतिदर्शन -धर्मागमकाव्याख्यान-साहित्यनाटकानि सर्वाणि संस्कृतभाषायां विद्यन्ते। एवञ्च ज्यौतिष-गणित-नीतिगीतीतिहासार्थराजनीति - धनुर्वेदायुर्वेदच्छन्दःशास्त्राणि संस्कृते एव वर्तन्ते। न ज्ञानविज्ञानयोः किमपि अङ्गं विद्यते, यन्न संस्कृतभाषायां स्यात् । वस्तुतस्तु -

'भूतले संस्कृता भाषा कामधेनुः प्रकीर्तिता ।
जननी सर्वभाषाणां विज्ञानस्योपकारिणी ।।'

जगत् जीवः परमात्मा च

-आचार्यदिगम्बरमहापात्रः
ए-३९९ विद्यानगरम् (कोयलनगरम्)
राउरकेला - ७६९०१४ (उडीसाप्रदेशः)

(१)

अद्वयोऽपि सदैवात्मा वृक्षे पक्षिद्वयं किमु ।
एको भुङ्क्ते फलं त्वन्योऽनश्नन् साक्षीव दर्शकः ।।

(२)

कर्त्ता भोक्ताऽभिमान्येष यात्यायाति पुनः पुनः ।
अमुत्रेह च देही स जीवात्मा गुणसङ्गतः ।।

(३)

परात्मा सर्वगो मुक्तो निर्गुणो निर्विकल्पकः ।
नित्योऽनन्तोऽद्वयोऽसङ्गो निर्लिप्तः सर्वतोमुखः ।।

(४)

फलभोक्ता स जीवात्मा परात्मा साक्षिरूपकः ।
वृक्षः शरीरमेवास्ति विद्ध्येतत् सकलं जगत् ।।

(५)

पूर्णमेतैस्त्रिभिर्विश्वं प्रकाशं याति सर्वथा ।
लीयते तत्र वै सर्वं जड़चेतनसङ्कुलम् ।।

(६)

स्थूलसूक्ष्मं च यत् किञ्चित् कारणं वा तथेतरत् ।
सर्वभूतानि जायन्ते म्रियन्ते च पुनः पुनः ।।

(७)

अयं मर्त्यः क्षणस्थायी संसारः क्षणभङ्गुरः ।
नामरूपात्मकं सर्वं जडं चेत्युच्यते जगत् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भाव-लहरी

- श्री फणिनारायणशर्मा सिग्देलः
अध्यापकः श्री तौलेश्वरनाथ - संस्कृत-माध्यमिकविद्यालयः
तौलिहवा, कपिलवस्तु, लुम्बिनी अञ्चलम् (नेपालः)

(१)

सुरगीः सुरभिर्दिवङ्गता किमु पातालबिलं गताऽधुना ।
अमरा नमृताऽस्त्यसौ मृत-जनतायाश्च सदोपकारिणी ॥

(२)

निजसंस्कृतिरक्षणव्रता इह देशे नहि सन्ति किं बुधाः ? ।
सुरवाग्-दिननाथ एष हि शिथिलोऽस्ताचल-सन्निधिं गतः ॥

(३)

रतिरस्ति न संस्कृतेः क्वचिन्न च रागो निज-संस्कृताविह।
बत राष्ट्रियता विषीदति नहि सैकात्मकभावना क्वचित्॥

(४)

सुरवागमृतार्णवं प्रियं बत पाश्चात्य-विकार-वाडवः।
परिशोषयते निरन्तरं सुधियस्तस्य निवारणं कथम्? ॥

(५)

जनकामदुघः सुरद्रुमः परभाषाविधिरीतिखण्डितः।
किमयं पतनोन्मुखोऽधुना जनभाषाविधिरीतिनन्दनः॥

(६)

परसंस्कृति-राहुणार्दितः किमदृश्यः सुरगीः सुधाकरः ।
निजसंस्कृतिरक्षणक्षमो बुधचक्री नहि कोऽपि दृश्यते॥

(७)

जननीरहिता सुदुःखिता कृशकाया परताप-पीडिता ।
नहि दीव्यति रोदिति प्रिया जनभाषा-जनरीतिनन्दिनी॥

(८)

इह गुप्तशरीर आगतः किमु वाताप्यसुरः सहापरः।
जनरीतिमुनीन् निहन्त्यसौ, चैतज्जठराण्यधिष्ठितः ॥

(९)

अह ! हा ! परितोऽभियाति नः परभाषादिहलाहलो दहन् ।
निजधर्मविधानरक्षको बुधशम्भुर्नहि दृश्यतेऽधुना॥

(१०)

जनगीर्विपिनद्रुमान् बहून् परभाषाद्विविदो लुनात्यहो।
धृतमुद्रणरूप आगतः पद - वातावरणं क्षिणोत्यसौ॥

(११)

इह लक्ष - शिरा मदोद्धतः परभाषाविधिरीतिरावणः ।
ध्वनिरूप - पद-प्रकाशकैर्बहु-सञ्चाररथैःरुपागतः ॥

(१२)

यतिरूपधरश्छलेन तां दशशीर्षः स जहार जानकीम् ।
नहि तत्र च तामदूषयत् स च रामेण शरैर्विहिंसितः ॥

(१३)

नहि लक्ष - शिराः पलायते जनहृद्पद्मगतः स राक्षसः ।
अहहाऽयमिहैव गर्जति जनभाषा - जननीं प्रदूषयन् ॥

(१४)

प्रथमं वसनान्यहापयद् विधिरीतिस्थिति-मान्यतास्ततः ।
अथ राष्ट्रियतां च हापयन् सकलान् दास्यसृतौ युनक्ति नः ॥

(१५)

इह तन्मदिरा - मदोद्धतैस्तनुजैः स्वा जननी विगीयते ।
असुरेण निपीड्यते च सा स्वसुतैस्तच्च सहर्षमीक्ष्यते ॥

(१६)

जननीं स पदार्थरूपिणीं ध्वनिमस्यावयवानि चान्वहम् ।
अदयः प्रहसञ् छिनत्ति हा ! जनभाषा - जननी प्रणश्यति ॥

(१७)

स्वपदावयवा न वाक्तनुर्ध्वनिरप्यस्ति निजो न भाषणे ।
नियताऽस्त्यधुना विभक्तिषु चरमे वाक्यविधौ क्रियास्वियम् ॥

(१८)

न तथा मनुजः प्रपीड्यते रिपुशस्त्र-व्रण - राशिभी रणे ।
स यथा निज-बुद्धि - नाशकैरिह सञ्चारशरैः प्रपीड्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१९)

बहुशो जनता सुरारता इति विज्ञाय सुरारता अपि ।
सुधियश्च निराशतागरमथवालस्यसुरां पिबन्ति किम् ? ॥

(२०)

नवनीतिसुदर्शने मे स तु वध्यो न परैर्महायुधैः ।
अत एव मया समर्पितं कविविष्णुभ्यः इतः पुरैव तत् ॥

(२१)

धानमानमदोद्धता जना स्वशिशूनाङ्ग्लशिक्षणालयान् ।
जनगीर्विधिरीतिमान्यता-परिहाराय नयन्ति निश्चयम् ॥

(२२)

परदास्यमदोद्धता जना जनभाषा-विधिरीति - भञ्जकाः ।
परगीर्मदिरां प्रपाय्य तान् पररीत्यादिमले क्षिपन्त्यनु ॥

(२३)

क्व गतः करुणासुधार्णवः क्व गताऽऽध्यात्मिकभाव - जाह्नवी ।
सकलाः सुखिनो भवन्त्विति क्व गता सा श्रुतिकामनाऽधुना ॥

(२४)

इह वैतरणी प्रसर्पति परितो घोरतमा तमोमयी ।
परशोषण-ताप-मारण-धनतन्त्रादि - मलौघवाहिनी ॥

(२५)

धनधान्यबलेन दुर्मदा यवनाः क्रिश्चियनाः समेधिताः ।
नहि तत्पथरोधनक्षमो जननेता जनवाहिनीपतिः ॥

(२६)

मम राष्ट्रमिदं वपुर्मम करणानि स्थितिमान्यता - गिरः ।
वपुरस्त्यखिलाङ्गसंयुतं न पृथक् तन्नय तानि कर्हिचित् ॥

(२७)

भवनं किल राष्ट्रनामकं परिवारो जनता स्वमार्गगा ।
न तृणेन वशेऽप्यजो भवेत् तृणसङ्घैस्तु करी च गृह्यते ॥

(२८)

जनसंस्कृतिनन्दने वने बहुरीतिस्थिति - मान्यता - द्रुमाः ।
पररीतिसमीरणोद्धता नहि नश्यन्तु मिथोऽभिघट्टनैः ॥

(२९)

गिरिराजशिरा गिरिस्तनी क्षितिवक्षा च नदी पयस्विनी ।
जननी नहि मृण्मयी मम ननु दृश्या शुभभावलोचनैः ॥

(३०)

मम राष्ट्रहरिर्विराजते जननी राष्ट्रियता रमा सदा ।
मम तद् द्वितयेऽस्तु सर्वदा जनतन्त्रात्मकचिन्मये रतिः ॥

(३१)

वसनं किल तद् द्वयस्य तु समभावोऽस्तु समाजवाद हि ।
उभयोर्नहि भिन्नताहृदि जनकृष्णादरभावना यदि ॥

(३२)

पदयुद्धमिदं पदाय वै जनसेवाविधये न दृश्यते ।
अत एव पदं गता जना धनभोगाभिरताः विशेषतः ॥

(३३)

अहिफेनसुखं विधर्मजं परिणामे बहुकष्टदायकम् ।
मरणञ्च स्वधर्म इष्यते परिणामे हितकृद् हि भेषजम् ॥

(३४)

मलपापुरमस्ति केरले परधर्मेण निपीड्यतेऽत्र तत् ।
परधर्मरतैस्तदुद्भवैरपि काश्मीरपुरी प्रतप्यते ॥

(३५)

दृढ़राष्ट्रियभावनां विना निजदेशोऽपि विखण्डितो भवेत् ।
यदि राष्ट्रियता बलीयसी निजराष्ट्रं किल तैरवाप्यते ॥

(३६)

बहुदुःखपदं गतोऽपि कौ नहि राणा यवनाऽनुगोऽभवत् ।
अमरोऽस्ति शुभैः स्वकर्मभिर्गमनीयं किल तस्य वर्त्म तत् ॥

(३७)

अमरः शिविरस्ति कर्मणा निजमांसेन कपोतरक्षकः ।
सुरवर्गहिताय देहदः स दधीचिर्ननु सद्गुरुर्मम ॥

(३८)

निज राष्ट्रियता - सुरक्षणार्पितदेहो मनुजः सदाऽमरः ।
स मृतोऽप्यमृतो मतः सदा विपरीतस्तु मृतोऽमृतोऽपि सः ॥

(३९)

निजसंस्कृतिरीतिजं प्रियं त्यजतु स्वादु न कर्कटीफलम् ।
परदास्यसृतीन्द्रवारुणी फलमश्नातु कदापि न भ्रमात् ॥

(४०)

जनजागरणो दिवाकरः पररीत्यादि - तमांसि नाशयेत् ।
जनमानसपङ्कजानि स जनभाषादिसरःसु कासयेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतभाषा साहित्यञ्च (२)

(नाममात्रेण परिचयः)

-डा. रामप्रतापतिवारी
अध्यक्षः संस्कृततिभागे
हेमवतीनन्दनबहुगुणागढ़वालविश्वविद्यालयस्य
श्रीनगरम् (गढवाल)

लौकिकसंस्कृतसाहित्यपरिचयः

काव्यम् [रमणीयार्थप्रतिपादकः शब्दः काव्यम् -पण्डितराजजगन्नाथः ।
वाक्यं रसात्मकं काव्यम् - विश्वनाथः कविराजः
तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि -आचार्यमम्मटः

शास्त्रीय - सहित्यम्
[शिष्यतेऽनेन इति शास्त्रम्]

दृश्यकाव्यम् - 'दृश्यं तत्राभिनेयं तद्रूपात्तु रूपकम्(विश्वनाथः)
अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते । रूपकं तत्समारोपात् (दशरूपके)

श्रव्यकाव्यम्

→ **नाटकम्**- ख्यातवृत्तं धीरोदात्तनायकयुतं, पञ्चसन्धिसमन्वितं पञ्चतो दशाङ्कमितं शृङ्गाररसप्रधानं वीररसप्रधानं वा नाटकम् । **अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम्** इति महाकविकालिदासविरचितानि त्रीणि नाटकानि । प्रथमशताब्द्या ई. पूर्वे । **मुद्राराक्षसम्** (विशाखदत्तप्रणीतम् ४०० ई.), **नागानन्दम्** (हर्षदेव ६०६-६४८ ई.) **वेणीसंहारः** (भट्टनारायणः ६५० ई.), **उत्तररामचरितम्** (भवभूतिः ६८० ई) **अनर्घराघवम्** (मुरारिः ८५० ई.), **बालरामायणम्** (राजशेखरः ९६० ई) **कुन्दमाला** (दिङ्नागः १००० ई.), **प्रबोधचन्द्रोदयः** (कृष्णमिश्रः १०५० ई.) **प्रसन्नराघवः** (जयदेवः १२०० ई.)। **मालतीमाधवम्** (भवभूतिः ६८० ई.), **महावीरचरितम्** (भवभूतिः ६८० ई.)।

→ **प्रकरणम्** कल्पितवृत्तं धीरप्रशान्तनायकयुतं, श्रृङ्गाररसप्रधानं पञ्चतो दशाङ्कमितं प्रकरणम् । मृच्छकटिकम् (शूद्रकः ७५० ई), **शारिपुत्रप्रकरणम्** (अश्वघोषः ७८-१२० ई)।

→ **भाणः** कल्पितवृत्तं धूर्तचरितयुतं वीरश्रृङ्गाररसप्रधानमेकाङ्कमभिनयं **भाणः** ।

→ **प्रहसनम्** कल्पितवृत्तं कामुकधूर्तादिपात्रयुतं हास्यरसप्रधानमेकाङ्कमभिनेयं **प्रहसनम्** ।

→ **डिमः** पौराणिकवृत्तं चतुरङ्कसमन्वितं धीरोदात्तनायकयुतं हास्यशृङ्गाररस- विरहितमभिनेयं **डिमः** ।

→ **व्यायोगः** पौराणिकं ख्यातवृत्तं धीरोदात्तनायकयुतं स्वल्पस्त्रीपात्रं हास्यशृङ्गाररसरहितमेकाङ्कं **व्यायोगः** इत्यभिनेयम् ।

→ **समवकारः** देवदैत्यसम्बद्धवृत्तं धीरोदात्तधीरोद्धतनायकयुतमङ्कत्रयसमन्वितं **समवकारः** इत्यभिनेयम् ।

→ **वीथीः** कल्पितवृत्तं शृङ्गारप्रियनायकयुतमेकाङ्कं 'वीथी' इत्यभिनेयम् ।

→ **अङ्कः** पौराणिकं ख्यातवृत्तं प्राकृतपुरुषनायकयुतं करुणरसप्रधानमेकाङ्कमभिनेयम् **अङ्कः** ।

→ **ईहामृगः** मिश्रवृत्तं, धीरोदात्तनायकयुतं चतुरङ्कसमन्वितं शृङ्गाररसप्रधानमभिनेयम् **ईहामृगः** ।

→ **नाटिका** प्रकरणाद् गृहीतवृत्तं, शृङ्गाररसप्रधानं चतुरङ्कसमन्वितमभिनेयं **नाटिका** ।
हर्षदेवेन (६०६-६४८ ई.) प्रणीते नाटिके-
१. प्रियदर्शिकानाटिका २. रत्नावलीनाटिका ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रव्यकाव्यम् (१)

पद्यकाव्यम्

आर्षकाव्यम्

→ रामायणम्
(श्रीमद्वाल्मीकिविरचितम्)
(५०० ई पूर्वात् पूर्वम्)

→ महाभारतम् (वेदव्यासप्रणीतम्)
(४०० ई पूर्वात् पूर्वम्)

→ महाभारतस्य विकासक्रमः

(i) जयः- ८८०० श्लोकाः
वक्ता- कृष्णद्वैपायनः,
श्रोता- वैशम्पायनः ।

(ii) भारतम्-
२४००० श्लोकाः
वक्ता- वैशम्पायनः,
श्रोता-अभिमन्युपौत्रः
जन्मेजयः।

(iii) महाभारतम्-
१००००० श्लोकाः,
वक्ता- सौतिः
श्रोता-शौनकादिऋषयो
नैमिषारण्ये।

महाकाव्यम्

सर्गबन्धो महाकव्यम्
१-कालिदासस्य
(i) रघुवंशम् (ii) कुमारसम्भवम्
२-अश्वघोषस्य (७८ ई)
(i) बुद्धचरितम् (ii) सौन्दरानन्दम्
३-भट्टिकाव्यम्
(भट्टिः ५५०-६१० ई)
४- किरातार्जुनीयम्
(भारविः ५६० ई)
५- जानकीहरणम्-
(कुमारदासः)
६- शिशुपालवधम्
(माघ , ६७५ ई)
७- हरविजयम् (रत्नाकरः)
८- नैषधीयचरितम्
(श्रीहर्षः १२ तमे शताब्दे)
९- राघवपाण्डवीयम्
(कविराजः ११८२ ई)
१०- यादवाभ्युदयम् (वेङ्कटनाथः),

→ बृहत्त्रयी-
(i)-किरातार्जुनीयम्
(ii) शिशुपालवधम्,
(iii) नैषधीयचरितम्

→ ऐतिहासिककाव्यम्
१-नवसाहसाङ्कचरितम्, (पद्मगुप्तप्रणीतम्)
२- विक्रमाङ्कदेवचरितम् (विल्हणप्रणीतम्),
३-राजतरङ्गिणी (कल्हणप्रणीता)

खण्डकाव्यम्-

खण्डकाव्यं भवेत्
काव्यस्यैकदेशानुसारञ्च।
१- कालिदासस्य
(i) मेघदूतम्
(ii) ऋतुसंहारः
२. अमरूशतकम् (अमरूप्रणीतम्)
३. घटकर्परखण्डकाव्यम्, (घटकर्परः)
४. चौरपञ्चशिका (बिल्हणप्रणीता)
५. पवनदूतम् (धोयीप्रणीतम्)
६. स्तोत्रसाहित्यम्,
७. गीतगोविन्दम् (जयदेवप्रणीतम्)

→ मुक्तककाव्यम् -
प्रत्येकं छन्दसः स्वतन्त्रतार्थप्रतिपादकम् मुक्तकम्
१. भर्तृहरिप्रणीतानि
(i) नीतिशतकम्,
(ii) वैराग्यशतकम्,
(iii) श्रृङ्गारशतकम्,
२. पण्डितराजजगन्नाथप्रणीतः भामिनीविलासः

पुराणम्

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितञ्चैव पुराणं पञ्च लक्षणम् ॥

(१)	अग्निपुराणम्	(२)	कूर्मपुराणम्
(३)	गरुडपुराणम्	(४)	नारदपुराणम्
(५)	पद्मपुराणम्	(६)	ब्रह्मपुराणम्
(७)	ब्रह्मवैवर्तपुराणम्	(८)	ब्रह्माण्डपुराणम्
(९)	भविष्यपुराणम्	(१०)	मत्स्यपुराणम्
(११)	मार्कण्डेयपुराणम्	(१२)	वामनपुराणम्
(१३)	वायुपुराणम्	(१४)	वाराहपुराणम्
(१५)	विष्णुपुराणम्	(१६)	लिङ्गपुराणम्
(१७)	श्रीमद्भागवत् पुराणम्	(१८)	स्कन्दपुराणम्।

गद्यकाव्यम्-[वृत्तबन्धोज्झितं गद्यम्]

→ कथा-प्रबन्धकल्पना कथा
१. आख्यानम्
(i) कादम्बरी (बाणभट्ट प्रणीता-६०६-६४८ ई.)
(ii) वासवदत्ता (सुबन्धु ६०० ई.)
(iii) दशकुमारचरितम् (दण्डीप्रणीतम् ६०० ई.)
(vi) मन्दारमञ्जरी (विश्वेश्वरपाण्डेयः १८ तमे शताब्दे)
(v) तिलकमञ्जरी (धनपालप्रणीता)
(vi) शिवराजविजयः (अम्बिकादत्तव्यासः)

→ नीतिकथा-
(i) पञ्चतन्त्रम् (विष्णुशर्मा), (ii) हितोपदेशः (नारायणपण्डितः)

→ लोककथा-
(i) बृहत्कथा (गुणाढ्यः), (ii) कथासरित्सागरः (सोमदेवप्रणीतः),
(iii) बृहत्कथामञ्जरी क्षेमेन्द्रप्रणीता (iv)शुकसप्ततिः- (हेमचन्द्रः)
(v) वेतालपञ्चविंशतिका शिवदासकृत् ।

→ आख्यायिका हर्षचरितम् बाणभट्टप्रणीतम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रव्यकाव्यम् (२)

चम्पूः

→चम्पूकाव्यम्- गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते ।
१- नलचम्पू (त्रिविक्रमभट्टप्रणीतः)
२- विश्वगुणादर्शः (वेंकटाध्वरिः)
३- आनन्दविलासः (कर्णपूरः),
४- गोपालचम्पू (जीवगोस्वामी)
→विरुद- गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यते ।
→करम्भकः - करम्भकं तु भाषाभिर्विविधाभिर्विनिर्मितम् ।

शास्त्रीयसाहित्यम्

धर्मशास्त्रम् - यतोभ्युदयनिःश्रेयस् सिद्धिः स धर्मः ।
i- मनुस्मृतिः (मनुप्रणीता),
ii- याज्ञवल्क्यस्मृतिः, (याज्ञवल्क्यप्रणीता)
iii- अर्थशास्त्रम्- (कौटिल्यप्रणीतम्), एते प्रमुखाः ग्रन्थाः सन्ति।

शास्त्राणि

दर्शनशास्त्रम् दृश्यत आत्मादितत्त्वमनेन इति दर्शनम् ।
द्विविधं भारतीयदर्शनम्
→नास्तिकदर्शनम् [नास्तिको वेदनिन्दकः । त्रीणि नास्तिकदर्शनानि]
१. चार्वाकदर्शनम् तदेव लोकायतिकदर्शनम् बार्हस्पत्यदर्शनं वा कथ्यते
२.जैनदर्शनम् ३. बौद्धदर्शनम्
→आस्तिकदर्शनानि [षड्दर्शनानि वा]
१. न्यायदर्शनम् अक्षपाददर्शनम् वा (गौतमः प्रवर्तकः) प्रमाणैरर्थपरीक्षणं न्यायः। प्रमेयशास्त्रं प्राचीनन्यायशास्त्रम्, प्रमाणशास्त्रं नव्यन्यायशास्त्रम् ।
(i) ग्रन्थ :- न्यायसूत्रम् (गौतमः) भाष्यम्- वात्स्यायनभाष्यम्, (ii) न्यायकुसुमाञ्जलिः (उदयनाचार्यः), (iii) न्यायमञ्जरी (जयन्तभट्टः), (iv) तत्त्वचिन्तामणि-(गङ्गेश उपाध्यायः) (v) तर्कभाषा-(केशवमिश्रः)
→२. वैशेषिकदर्शनम्- विशेष इति पदार्थस्य निरूपणादेवेदं वैशेषिकदर्शनम्। इदमेव 'औलूक्यदर्शनम्' कणादप्रणीतम् ग्रन्थः । (i) प्रशस्तपादप्रणीतः पदार्थधर्मसंग्रहः। (ii) प्रशस्तपादभाष्यम्, (iii)प्रशस्तपादभाष्यटीकाः, -किरणावली-(उदयनाचार्यप्रणीता), -न्यायकन्दली- (श्रीधरप्रणीता) । न्यायलीलावती-वल्लभाचार्यप्रणीता,-व्योमवती -व्योमशेखर प्रणीता
→सांख्यदर्शनम्- नास्ति सांख्यसमं ज्ञानम्। संस्थापक-(कपिलः), ग्रन्थः- षष्टितन्त्रम् (वार्षगण्यप्रणीतम्) संख्यकारिका-(ईश्वकृष्णः) सांख्यकारिकाटीकाः -माठरवृत्तिः, गौडपादभाष्यम्, -सांख्यतत्त्वकौमुदी (वाचस्पतिमिश्रप्रणीता)
→योगदर्शनम् [योगश्चित्तवृत्तिनिरोधः, प्रवर्तकः (पतञ्जलिः) तेन योगसूत्रं प्रणीतम् व्यासेन योगसूत्रभाष्यम् लिखितम् ।]
→५. मीमांसादर्शनम् कर्मकाण्डप्रवर्तकं मीमांसा-दर्शनम्। प्रवर्तकः- (जैमिनिः) ग्रन्थः- मीमांसासूत्रम्- शाखे-i. भाट्टशाखा ii., प्राभाकराशाखा।
→वेदान्तशास्त्रम् [वेदान्तो नामोपनिषत् प्रमाणम्, वेदान्तप्रस्थानत्रयी] i. उपनिषद्, ii. ब्रह्मसूत्रम्, iii. श्रीमद्भगवद्गीता,
→वेदान्तसम्प्रदायाः (1)शाङ्करवेदान्तः, निर्विशेषाद्वैतवादः जगद्गुरु शङ्कराचार्यः,]
→चत्वारो वैष्णवसम्प्रदायाः ii. विशिष्टाद्वैतवादः (रामानुजाचार्यः, iii. द्वैतवादः (मध्वाचार्यः) iv. द्वैताद्वैतवादः (निम्बार्काचार्यः) v. शुद्धाद्वैतवादः (भास्कराचार्यः)

काव्यशास्त्रम्
१ नाट्यशास्त्रम् (भरतः)
२. काव्यालङ्कारः(भामहः)
३. काव्यादर्शः (दण्डी)
४. काव्यालङ्कारसूत्रम् (वामनः),
५. काव्यालङ्कारः (रुद्रटः)
६. ध्वन्यालोकः (आनन्दवर्धनः),
७. अभिनवभारती (अभिनवगुप्तः)
८.वक्रोक्तिजीवितम् (कुन्तकः),
९.व्यक्तिविवेकः, (महिमभट्टः)
१०. दशरूपकम् (धनञ्जयः),
११. सरस्वतीकण्ठाभरणम् (भोजराजः)
१२. काव्यप्रकाशः (मम्मटः),
१३. औचित्यविचारचर्चा (क्षेमेन्द्रः),
१४ कुवलयानन्दः (अप्पयदीक्षितः)
१५. चन्द्रालोकः (जयदेवः),
१६. नाट्यदर्पणः(रामचन्द्रः),
१७ काव्यमीमांसा (राजशेखरः)
१८.रसगङ्गाधरः - राज जगन्नाथः
१९. साहित्यदर्पणः (कविराज विश्वनाथः)
२०. काव्यानुशासनम् (हेमचन्द्रः)
२१. अलङ्कारसर्वस्वः (रूय्यकः),

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्राणि

→**व्याकरणशास्त्राम्**
प्राक्पाणिनेः वैयाकरणाः,
i. आपिशालिः, ii. काश्यपः, iii. गार्ग्यः,
iv. गालवः, v. शाकटायनः, vi. शाकल्यः,
vii. भागुरिः, vii. काशकृत्स्नः

→**अन्यवैयाकरणाः**
१ ऐन्द्रव्याकरणम् (इन्द्रप्रणीतम्),
२. चान्द्रव्याकरणम् (बौद्धभिक्षुचन्द्र विरचितम्),
३. शाकटव्याकरणम् (शाकट विरचितम्),
४. पाणिनिव्याकरणम्
(पाणिनिवंशस्य शाकटविरचितम्),

→**पाणिनेर्ग्रन्थाः**
१. पाणिनितन्त्रम् ।
२. प्रत्याहारसूत्रम् ।
३. अष्टाध्यायी ।
४. पाणिनीयशिक्षा ।

→**वार्तिककारः**
कात्यायनस्य (वार्तिकपाठः)

→**महाभाष्यकारः** पतञ्जलिः

→**महाभाष्यस्य टीकाकाराः** -
१. भर्तृहरिः (महाभाष्यदीपिका, वाक्यपदीयम्)

→**अष्टाध्यायीवृत्तिकारः**
1. वररुचिः अष्टाध्यायीवृत्तिः

→**आयुर्वेदशास्त्रम्**
ग्रन्थाः
i. चरकसंहिता ।
ii. सुश्रुतसंहिता ।
iii. माधवनिदानम् ।
vi. शार्ङ्गधरसंहिता ।
v. भावप्रकाश ।

प्रपिबन्तु चायम्

-अञ्जू रानी
ए-१०, रेलवे रोड, मोदी नगर,
गाजियाबाद (उ.प्र.)

(१)
स्थानं यदा शकटिका पथिकैः पुरोगैः,
प्राप्तुं सरत्यनुपथं प्रथितप्रथेयम्।
कोलाहलः प्रचलतीव सदा जनौघे,
चायं पिबन्तु सुहृदः प्रपिबन्तु चायम् ॥

(२)
पत्राणि हैमशिखरानुगपर्वतेभ्यः,
प्रायो विचीय लवली सदृशानि पात्रे ।
चेयानि गन्धबहुलानि हि सन्ति पार्श्वे,
चायं पिबन्तु महितं प्रपिबन्तु चायम् ॥

(३)
एलान्वितं सजलदुग्धसमन्वितं मे,
ते शर्कराधिकयुतं मम तुल्यमानम् ।
इत्थं सरोषकलहेन निमन्त्रयन्ते,
चायं पिबन्तु मधुरं प्रपिबन्तु चायम् ॥

(४)
नेदं मतं सुरजनाय कदाचिदेवं,
ते यान्तु देवसरणिप्रहितान् हि लोकान् ।
तेभ्योऽमृतं क्रमश एष्यति मोहनीयं,
चायं पिबन्तु कलशेन पिबन्तु चायम् ॥

(५)
अस्मिंस्तु मृत्युपथगामिनि मर्त्यलोके,
क्लान्तिं तु नाशयति केवलचायपानम् ।
पीत्वा प्रसीद भुवनेऽमृतभूतमेनं,
चायं पिबाद्य चषकेण पिबाद्य चायम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पोषिता प्रकृतिः संस्कृतसाहित्ये

- डॉ. शिवकुमारशास्त्री
पूर्वप्राध्यापकः व्याकरणविभागे
जयभारत साधु महाविद्यालयः,
हरिद्वारम् (उत्तराञ्चलम्)

ब्रह्मणः सृष्टौ उत ब्रह्मणो विवर्तभूतेऽस्मिञ्जगति प्राणिनो येन माध्यमेन परस्परं विचाराणामादानप्रदानं स्पष्टं सरलं सुगमञ्च कुर्वन्ति तन्माध्यम एव 'भाषा' इति पदमारोढुं समर्थो भवति। भूमण्डलेऽस्मिन् बहवः भाषाः सन्ति, तासु तासु च भाषासु या भाषा ऋषिभिः ध्याने गृहीता, देवैः संस्थापिता, सर्वविध-संस्कारैश्च युक्ता, वैज्ञानिकैः सङ्गणकाय सर्वोत्तमा भाषा इति ख्यापिता, सा भाषा संस्कृत-भाषा एव। अन्यासां सर्वासां भाषाणां मातृत्वपदमारूढा इयं भाषा।

अस्याः भाषायाः साहित्यं वैदिकं लौकिकं चोभयविधं प्राचीनं व्यापकं, चतुर्विधपुरुषार्थाणां, सर्वविध-व्यवहाराणां, सर्वविध-रचनानां, सर्वविधानां विद्यानां, सर्वासां नीतीनां, वेदानां, वेदाङ्गानां, पुराणानां, सर्वविध-शास्त्राणां, शिल्पानाम्, औषधीनाञ्च आकरमेव। किमधिकं चतुर्दश-भवनेषु यत्र यत्र यद् यद् अस्ति, तस्य सर्वस्य वर्णनं संस्कृत-साहित्ये वर्णितमस्ति। एवंविध-गाम्भीर्येऽगाधे चास्मिन् साहित्ये वानस्पतिक-प्रेम-वर्णनं सर्वत्र बहुविधं दृष्टिपथमायाति। यथा आरण्यक-ग्रन्थाः अरण्ये एव रचिताः सन्ति। उपनिषद्-ग्रन्थाः स्वस्मिन् वर्णितं ज्ञानं द्रढीकर्तुम् अरण्यवासमेव कर्तुमुपदिशन्ति। यथा- 'करतल-भिक्षा तरुतलवासः।' यतो हि जनपदेषु मोक्षेच्छा सफला न भविष्यति।

एवंभूतेऽस्मिन् साहित्ये वानस्पतिक-प्रेम्णो गवेषणङ्कर्तुं जिज्ञासुः कोऽपि यदा निमज्जति तदा 'यदत्रास्ति तत्सर्वत्र, यन्नेहास्ति न तत् क्वचित्।' पंक्तेरस्याः आश्रयपदं महाभारतमेव धर्मवृक्षञ्चाश्रित्य विततमस्ति। यथा-

दुर्योधनो मन्युमयो महाद्रुमः,
स्कन्धः कर्णः शकुनिस्तस्य शाखा।
दुःशासनः पुष्पफले समृद्धे,
मूलं राजा धृतराष्ट्रोऽभिमानी॥

श्लोकोऽयमधर्मवृक्षङ्कथयति, धर्मवृक्षं वर्णयन् श्लोकमवलोयन्तु भवन्तः। यथा -

युधिष्ठिरो धर्ममयो महाद्रुमः,
स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखा।
माद्रीसुतौ पुष्पफले समृद्धे,
मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च॥

न केवलं महाभारते वनस्पतिप्रेम्णो दर्शनं भवति, अपितु संस्कृतसाहित्यं स्वयमेव वनस्पतिस्वरूपमस्ति। यथा-

धर्मदृढबद्धमूलो वेदस्कन्धः पुराणशाखाढ्यः।
क्रतुकुसुमो मोक्षफलो मधुसूदनः पादपो जयति॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गरुड़पुराणस्य श्लोकेऽस्मिन् वेदाः स्कन्धत्वेन पुराणाश्च शाखात्वेन वर्णिताः सन्ति। इमे च संस्कृतसाहित्यस्य मूलभूताः ग्रन्थाः सन्ति।

श्रीमद्भागवते ब्रह्माण्डमेव वनस्पतिरूपेण वर्णितमस्ति। यथा

एकायनोऽसौ द्विफलस्त्रिमूलश्चतूरसः पञ्चविधः षडात्मा।
सप्तत्वगष्टविटपो नवाक्षो दशच्छदी द्विखगः ह्यादिवृक्षः॥

ऋग्वेदेऽपि यथा-

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषष्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽअभिचाकशीति॥

अपि च-

श्रीमद्भागवते यदा महारासं रचयन् भगवान् कृष्णः गोपिकाभ्योऽन्तर्हितं भवति, तदा भगवता व्यासेन वर्णिताः गोपिकाः रागवशादचेतनां प्रकृतिं वनस्पतिं पृच्छन्ति। यथा-

दृष्टो वः कच्चिदश्वत्थप्लक्षन्यग्रोधनो मनः।
नन्दसूनुर्गतो हृत्वा प्रेमहासावलोकनैः॥
कच्चित् कुरबकाशोकनागपुन्नागचम्पकाः।
रामानुजो मानिनीनामितो दर्पहरस्मितः॥
कच्चित्तुलसिकल्याणि गोविन्दचरणप्रिये।
सह त्वालिकुलैर्बिभ्रद् दृष्टस्तेऽतिप्रियोऽच्युतः॥
मालत्यदर्शिवः कच्चिन्मल्लिके जातियूथिके।
प्रीतिं वो जनयन्मातः करस्पर्शेन माधवः॥

चूतप्रियालपनसासनकोविदार -
जम्ब्वर्क - बिल्वबकुलाम्रकदम्बनीपाः।
येऽन्ये परार्थभवका यमुनोपकूलाः
शंसन्तु कृष्णपदवीं रहितात्मनां नः॥

पाणिनीयाष्टाध्याय्यामपि तदवलोकनीयं यथा- 'कुटी शमी शुण्डाभ्यो रः।(५/३/८८) सूत्रमिदं ह्रस्वं शमी-वृक्षं वक्तुं 'शमीर' इति शब्दं साधु करोति।

श्रीमद्भगवद्गीतायामपि वर्तते। यथा-

ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित्॥
गीता १५/१

-अपि च-

वेदानां सारभूता या भगवता श्रीकृष्णेन गीता श्रीमद्भगवद्गीता तस्याः श्लोकांशोऽयम् 'आत्मवत् सर्वभूतेषु' अर्थात् भूतः नाम प्राणी चेतनः स्यादचेतनो वा तस्मिन् आत्मवदेव व्यवहरणीयः। भगवतः श्रीकृष्णस्य कथनमिदमनुकुर्वन् कालिदासः स्वकीये 'अभिज्ञानशाकुन्तलम्' नाम नाटके अनुसूया-शकुन्तलयोः मध्ये वार्तालापमाध्यमेन 'नवमालिका' नाम लतां नवयौवनावदाम्रवृक्षञ्च पुरुषवदिति च वर्णितमस्ति। यथा-

अनुसूया-

हला शकुन्तले! इयं स्वयंवरवधूः सहकारस्य त्वया कृतनामधेया वनतोषिणीति नवमालिकाम् एनां विस्मृताऽसि।

शकुन्तला-

तत आत्मानमपि विस्मरिष्यामि। हला! रमणीयः खलु कालः अस्य पादपमिथुनस्य रतिकरः संवृत्तः। येन नवकुसुमयौवना नवमालिका, अयमपि बहुफलतया उपभोगक्षमः सहकारः।'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत्र नवकुसुमयौवना नवमालिका अस्ति। आम्रवृक्षश्च बहुफलतया तस्याः उपभोगं कर्तुं क्षमोऽस्ति। इत्थं लतावृक्षयोः नायिका- नायकयोरिव वर्णनमुदात्तपोषितप्रकृतेः उदाहरणम्।अन्यदपि समवलोकनीयम्। यथा-

'अनुसूया-

हला शकुन्तले! इयं तातकण्वेन त्वमिव स्वहस्तेन संवर्धिता माधवीलता तत्कथमिमां विस्मृताऽसि ।

शकुन्तला-

तत आत्मानमपि विस्मरिष्यामि। अत्र तात्कण्वेन आत्मानमिव पालितां मांधवीलतां विस्मरिष्यामि तर्हि आत्मानमपि विस्मरिष्यामि ।'

इति कथनस्याभिप्रायङ्कियदुदात्तम्। वानस्पतिकी माधवीलता पृथग्भूता न अपितु आत्मस्वरूपा एव। अन्यत्रापि समवलोकनीयम् । यथा-

अनुसूया-

हला प्रियंवदे! अत एव सस्नेहा शकुन्तला माधवीलतां सिञ्चति ।

शकुन्तला-

यतो भगिनि मे भवति ततः किमिति न सिञ्चामि।'

अत्र महाकविना कालिदासेन वानस्पतिकप्रेम्णः पराकाष्ठा संस्पर्शिता। स्यादपि कथन्न, यतो हि जडभूता लता एव शकुन्तलायाः भगिनित्वेन वर्णिता अस्ति ।

न केवलं पृथग्भूतासु वनस्पतिष्वेव चेतनवद्व्यवहारः अपितु शकुन्तलायाः लावण्यमेव प्रकृत्या समं वर्णयति महाकविकालिदासः। यथा अधरस्य लालिमा किसलयवत् बाहूकोमलविटपवत् अङ्गेषु यौवनङ्कुसुमवत्-

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ।।

अपि च, शकुन्तलायाः पतिगृहगमनकाले महर्षिकण्वस्य कथनमिदमतीव रमणीयं वर्तत । यथा-

'कण्वः -

भोः! भोः! सन्निहितवनदेवतास्तवः !
पातुं न प्रथमं व्यवस्यति जलं युष्मास्वसिक्तेषु या,
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आदौ वः कुसुमप्रवृत्तिसमये यस्याः भवत्युत्सवः,
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ।।'

श्लोकेऽस्मिन् शकुन्तलायाः वानस्पतिक- प्रेम महाकविना कण्वमाध्यमेन यथा वर्णितं तथा संस्कृतसाहित्ये अन्यत्र सत्यपि वानस्पतिकवर्णने न एवमुदात्तं, हृदयस्पर्शि, सजीववर्णनङ्कुत्रापि प्राप्यते । रघुवंशे यथा-

यदा राजा दिलीपः ऋषिवर्यस्य वसिष्ठस्य होमधेनुं चारयन् वने प्रतिदिनं गच्छति स्म, तदा एकस्मिन् दिने नन्दिनी तस्य सेवायाः परीक्षणं कर्तुं मायया रचितेन सिंहेनाक्रन्दिता सती उच्चैः क्रन्दनं कृतवती। श्रुत्वेदं क्रन्दनं वनस्पतेरवलोकने दत्तावधानो नृपदिलीपः समीपं गच्छति । सिहं च हननेऽसमर्थः सन्नात्मानमर्पयति । अस्मिन्नेव प्रसङ्गे सिंहः स्वात्मानं भगवता शङ्करेण नियुक्तमिव देवदारु- वृक्षरक्षणार्थं वनजैः मतङ्गजै इति कथयति । सो वृक्षः सतीदेव्या कथं पालितमस्ति, इत्थवलोकयन्तु भवन्तः । यथा-

अमुं पुरः पश्यसि देवदारुं,
पुत्रीकृतोऽसौ वृषभध्वजेन।
यो हेमकुम्भस्तननिःसृतानां
स्कन्दस्य मातुः पयसां रसज्ञः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयं पुरतः संस्थितो वृक्षः स्तन्यपानेन पुत्रीकृतोऽस्ति । एकदा केनापि गजेन कण्डूयमानः सन् अस्य त्वगुन्मथिता आसीत्, अतोऽहमत्रास्य वृक्षस्य संरक्षणार्थं नियुक्तः अस्मि। यथा-

कण्डूयमानेन कटं कदाचिद्
वन्यद्विपेनोन्मथिता त्वगस्य।
अथैनमद्रेस्तनया शुशोच
सेनान्यमालीढमिवासुरास्त्रैः॥

न केवलं महाकविना कालिदासेनापितु माघेन रचिते 'शिशुपालवधम्' नाम्नि महाकाव्ये माघेनर्तुवर्णनप्रसङ्गे कियत्सफलं सजीवं मनोहारि च वर्णनङ्कृतं वसन्तस्य। वसन्ततौ वनस्पतिः कथं नववधूरिव मोहयति पक्षिणः, मूर्छयति च स्वभोक्तारमिव भ्रमरान्, आह्वायति च पुत्रमिव कृषकान्, तोषयति च पतिमिव व्यापारिणः, उपदिशति चालङ्कारान् धर्तुं सखीप्रमदामिव, निर्दिशति च सदाचरितुं गुरुः शिष्यमिव जनान्, अलङ्करोति च जननी पुत्रमिव भुवम्। यथा वर्णितं सौन्दर्यं वसन्तस्य-

नव-पलाश-पलाशवनं पुरः
स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्ततलान्तमलोकयत्
स सुरभिं सुरभिं सुमनोभरैः॥

एवमालोडनङ्क्रियते चेत् संस्कृत-साहित्यस्य तदा बहुधा वानस्पतिकप्रेम - वर्णनं दृष्टिपथमायाति। उपदिशति च वनस्पतिना सह प्रेम कर्तुं पर्यावरणं संरक्षितुम्। यतो हि-

पठ्यते यादृशं यैः यैः साहित्यं हि यदा यदा ।
क्रियते तादृशं तैः तैः आचरणं तु तदा तदा ॥

ॐ शम्

नदी

-डॉ. हर्षदेवः माधवः
३०६, विसत एवेन्यू, वासना वैरेज रोड
अहमदाबाद ३८०००७ (गुजरात)

- नद्याः मधुरं स्नानं
  तटं
  चोषितुं मे मनीषाऽस्ति ॥
- वृक्षः
  अकिञ्चनावृतायै नद्यै
  ददाति
  स्वप्रतिच्छायामयं हरितवस्त्रम् ॥
- नराधमैर्दूषिता नदी
  अधुना
  वाराङ्गनायते ॥
- यद्यहं
  समुद्रत्वमप्राप्स्यं
  तर्हि
  काऽपि नदी
  मम प्रियाऽभविष्यत् ॥
- दुःशासनहस्तौ तटौ
  कर्षतः
  पीडितां नदीम् ॥
- मय्यपि
  नद्येका निवसति
  किन्तु
  त्वयि
  नास्ति समुद्रः ॥
- नद्याः
  नलमये करतले
  मदयन्तिकायति
  वृक्षहरितच्छाया ॥
- जलगवाक्षात्
  नदी
  दर्शयति
  चन्द्रमुखम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृत - समाचाराः

अनौपचारिकसंस्कृतशिक्षणकेन्द्रस्य समापनसमारोहः सम्पन्नः

(देहरादूनम्) । राष्ट्रिय-संस्कृत-संस्थानेन सञ्चालितस्य अनौपचारिक-संस्कृत-शिक्षणकेन्द्रस्य समापनसमारोहः अत्र सरस्वती - विद्यामन्दिरे धर्मपुरे सम्पन्नः सञ्जातः ।

समारोहेऽस्मिन् मुख्यातिथिः डॉ. सन्तोष- कुमारः 'शीलः' जिला-शिक्षा-अधिकारी-देहरादूनम्, अध्यक्षः डॉ. महावीर अग्रवालः पूर्वकुलसचिवः गुरुकुलकांगड़ीविश्वविद्यालयः हरिद्वारम्, विशिष्टातिथिः डॉ. प्रेमचन्द्रशास्त्री क्षेत्रीय-संयोजकः विश्व-आयुर्वेद-परिषद्, डॉ. डी.पी. जोशी विद्यालयाध्यक्षः, डॉ. मोहनलाल जोशी प्राचार्यः श्री लक्ष्मण-संस्कृत-महाविद्यालयः देहरादूनम् च उपस्थिताः आसन् ।

समारोहं सम्बोधयन् डॉ. सन्तोषकुमार - शीलः उक्तवान् यत् संस्कृतेन विना अस्माकं संस्कृतिः सुरक्षिता नास्ति । संस्कृतभाषायाः आवश्यकता सर्वेभ्यः अस्ति । वयं पाश्चात्य-संस्कृत्याः अनुसरणं कुर्वन्तः स्मः। सः उक्तवान् यत् एतानि केन्द्राणि अनौपचारिक-केन्द्राणि न भूत्वा औपचारिकरूपेण चलेयुः ।

कार्यक्रमाध्यक्षः डॉ. महावीर अग्रवालः उक्तवान् यत् प्राचीनकाले अस्माकं स्वर्णिमसमयः आसीत् यदा नृपः भृत्यः, आबालवृद्धाः सर्वे एव संस्कृतेन वदन्ति स्म । विशिष्टातिथिः डॉ. प्रेमचन्द्र शास्त्री प्रास्ताविकभाषणं दत्तवान् । केन्द्राध्यक्षः संयोजकश्च भानुप्रकाश गुप्तः धन्यवादं प्रकटितवान् । डॉ. डी.पी. जोशी अपि स्वविचारान् प्रकटितवान् । कार्यक्रमस्य सञ्चालनं केन्द्रशिक्षकः हरीशचन्द्र- गुरुरानिना कृतम् ।

कार्यक्रमे संस्कृतभारत्याः कार्यकर्तारः प्रकाशचन्द्रपन्तः, आशारामैठाणी, दीपक - नवानी, रेखा शर्मा, जी.पी. बडोनी, सुनीलप्रसादः, रेखा डबराला, मनमोहनः, श्रद्धा, पूजा चौधरी, सुनीता डोगरा इत्यादयः कार्यकर्तारः उपस्थिताः आसन् ।

गायत्रीमहिमा इति धारावाहिकस्य सान्द्रमुद्रिकायाः लोकार्पणम्

(हरिद्वारम्)। 'गायत्रीमहिमा' इति दूरदर्शन-धारावाहिकस्य ध्वनिमुद्रिकानां सान्द्रमुद्रिकानां च विमोचनम् अत्र शान्तिकुञ्जसभागारे सञ्जातम् । अस्मिन् अवसरे धारावाहिकस्य सर्वे अभिनेतारः अभिनेत्र्यश्च उपस्थिताः आसन् । एते सर्वे कलाकाराः रामायणमहाभारतयोः धारावाहिकयोः कार्यं कृतवन्तः आसन् । समारोहं सम्बोधयता गायत्री - परिवार-प्रमुखेण डॉ. प्रणवपण्ड्यावर्येण उक्तं यत् गायत्री ब्राह्मणत्वं प्रदायिनी कामधेनुः अस्ति ।

धारावाहिकस्य निर्देशकः धर्मेश तिवारी, प्रसिद्धः अभिनेता अरुण गोविलः, गजेन्द्र चौहानः, आदर्शश्च गायत्र्याः महिमानं वर्णितवन्तः । अभिनेत्री वर्षा उसगॉवकरा, अनुराधा तिवारी, लेखकः श्रीमस्तः निर्मात्री श्रीमती मीना तिवारी अपि स्वविचारान् प्रकटितवन्तः ।

शान्तिकुञ्जव्यवस्थापकः गौरीशङ्करः पीतवस्त्राणि आच्छाद्य कलाकारान् अभिनन्दितवान् । डॉ. प्रणव - पण्ड्या सर्वेभ्यः पं. श्रीरामशर्मणा विरचितं साहित्यं प्रदत्तवान् । सर्वे सदस्याः शैलभगिनीं मिलित्वा आशीर्वादं प्रसादं च प्राप्तवन्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतगौरवेण एव भारतस्य गौरवः डॉ० मैठाणी

(देहरादूनम्)। भारतस्य मूलस्रोतः संस्कृतभाषा अस्ति। वैदेशिकाः अत्र संस्कृतस्य ज्ञानम् अर्जितुम् आगच्छन्ति । इयं भाषा मातृवत् अस्मान् पालयति । संस्कृतस्य गौरवेण एव वयं भारतस्य गौरवं पुनः प्रतिष्ठापयितुं शक्ष्यामः । अस्य रक्षा अस्माकं सर्वेषां पुनीतं कर्तव्यम् अस्ति ।

उक्तविचारान् प्रकटितवान् डॉ. वाचस्पति-मैठाणी, उपशिक्षा निदेशकः संस्कृतम् (मुख्यालयः) । सः अत्र मङ्गलादेवी इण्टरविद्यालये राष्ट्रिय-संस्कृत-संस्थानेन सञ्चालितस्य त्रैमासिकस्य अनौपचारिक-संस्कृत-शिक्षणकेन्द्रस्य समापनसमारोहे मुख्यातिथिरूपेण स्वविचारान् प्रकटयति स्म ।

कार्यक्रमस्य अध्यक्षः डॉ. मोहनलाल - जोशी प्राचार्यः श्रीलक्ष्मण-संस्कृत-महाविद्यालयः कार्यक्रमे उपस्थितान् सम्बोधयन् उक्तवान् यत् संस्कृतभाषा सृष्ट्या सह एव समुत्पन्ना । पाश्चात्यजनैः एतस्याः उपरि बहुविधाः कुठाराघाताः कृताः तथापि एषा अमृतवाणी देववाणी वर्तते । यथा गङ्गानदी सागरपर्यन्तं सर्वेषां कल्याणं विदधति तथैव संस्कृतभाषा अपि सम्पूर्णविश्वस्य जनानां कल्याणं करोति ।

इतः पूर्वं विद्यालयस्य प्रधानाचार्यः डॉ. बुद्धदेवशर्मा केन्द्राध्यक्षः संयोजकश्च संस्कृतभाषां प्रति असम्यग्धारणाः खण्डयित्वा वर्तमानपरिप्रेक्ष्ये संस्कृतस्य महत्त्वं प्रतिपादितवान् । सः उक्तवान् यत् सम्पूर्णे उत्तराञ्चले एतादृशानि एव ३५ केन्द्राणि चलन्ति येषु संस्कृतसम्भाषणस्य शिक्षणं दीयते ।

कार्यक्रमस्य आरम्भः मुख्यातिथिना डॉ. मैठाणीवर्येण, अध्यक्षेण डॉ. जोशीवर्येण, विशिष्टातिथिना डॉ. भट्टवर्येण दीपप्रज्ज्वालनेन सरस्वतीमातरि पुष्पार्चनेन सह कृतम् । केन्द्रस्य प्रतिभागिनः छात्राः वैदिकं मङ्गलाचरणं, सरस्वती-वन्दनां, स्वागतगीतं, संस्कृतगीतिकानि च मधुरस्वरेण गीतवन्तः । कु. पूजा प्रजापतिः, पङ्कज - पन्तश्च स्वानुभवकथनं कुर्वन्तौ उक्तवन्तौ यत् तौ कथं केन्द्रस्य प्रभावेण संस्कृतसम्भाषणे दक्षाः सञ्जातौ ।

कार्यक्रमस्य सञ्चालनं केन्द्रशिक्षकेण आशाराम - मैठाणिना कृतम् । अस्मिन् अवसरे विद्यालयशिक्षिका श्रीमती कमला विजल्वाण, आर.पी. शर्मा, महेन्द्र सिंहः, संस्कृतभारत्याः कार्यकर्तारः विभिन्नकेन्द्राणाम् अनौपचारिकशिक्षकाः हरीशगुरुरानी, दीपक - नवानी, लक्ष्मी भट्टा, आलोक - भट्टः, जी.पी. बडोनी, अंजू सुयाल इत्यादयः समुपस्थिताः आसन् ।

शान्तिकुञ्जे त्रिदिवसीया कार्यशाला सम्पन्ना

(हरिद्वारम्)। शान्तिकुञ्जम्। देवसंस्कृतिविश्वविद्यालय - परिसरे त्रिदिवसीया राष्ट्रिया क्षेत्रीय-कार्यशाला अत्र सम्पन्ना सञ्जाता । कार्यशालां सम्बोधयन् शान्तिकुञ्ज-प्रमुखः डॉ. प्रणव - पण्ड्या आशां प्राकटयत् यत् इताः उद्भूताः वैचारिक-तरङ्गाः केवलं भारतवर्षम् एव न अपितु विश्वं स्वप्रवाहे मेलयिष्यन्ति । व्यवस्थापकः गौरीशङ्करः, केसरी कपिलः, डॉ. ए.के. दत्ता, डॉ. ओ.पी. शर्मा, प्रो. प्रमोद भटनागरः, च कार्यशालां सम्बोधितवन्तः।

इतः पूर्वं क्षेत्रानुसारेण क्षेत्रप्रभारिणः वीरेन्द्र तिवारी, डॉ. ओ.पी.शर्मा, सन्दीपकुमारः, अशरणशरण श्रीवास्तवः, अशोकदासः, सुरेश उपाध्यायः, राकेश जायसवालः च क्षेत्रीय-कार्यकर्तृणां गोष्ठीः कृतवन्तः। समारोहे डॉ. प्रणव -पण्ड्या मधुरं गीत गीतवान् । प्रतिभागिनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देवसंस्कृतिविश्वविद्यालयस्य अन्तेवासिनः स्व-स्व-क्षेत्रेषु कार्यानुभवानुसारं आहूतवन्तः। ज्ञातव्यम् अस्ति यत् विश्वविद्यालयीयाः छात्राः मासत्रयात्मकं कार्यानुभवं प्राप्तुं विभिन्न-क्षेत्राणि गच्छन्ति । साम्प्रतं यावत् २५० छात्राः कार्यानुभवं प्राप्तवन्तः सन्ति ।

संस्कृतशिक्षकप्रशिक्षणवर्गस्य उद्घाटनंसञ्जातम्

(हरिद्वारम्)। संस्कृतभारत्या आयोजितम् संस्कृत-शिक्षक-प्रशिक्षण-वर्गस्य आरम्भः अत्र ऋषि-संस्कृत-महाविद्यालये निर्धननिकेतने सञ्जातः। प्रशिक्षणवर्गे सम्पूर्ण-उत्तराञ्चलस्य मेरठक्षेत्रस्य च २०० संस्कृतसम्भाषण-शिक्षकाः भागं गृह्णन्ति । कार्यक्रमस्य उद्घाटनं महाविद्यालयस्य आश्रमस्य च संस्थापकेन ऋषिवर्येण सरस्वतीमातुः समक्षं दीप - प्रज्जवालनेन कृतम् । कार्यक्रमस्य मुख्यातिथिः नगरविधायकः मदनकौशिकः अध्यक्षः प्रसिद्धसंस्कृतविद्वान् बुद्धिबल्लभः शास्त्री, वर्गाधिकारिणी संस्कृतमहाविद्यालस्य प्राचार्या डॉ. सतीश गुलाटी- वर्या च आसन् ।

कार्यक्रमे उपस्थितान् सम्बोधयन् मुख्यातिथिः मदनकौशिकः उक्तवान् यत् अस्माकं देशे संस्कृतभाषा एव जनभाषा आसीत् । तर्हि एतस्य पतनस्य कारणस्य विश्लेषणम् अस्माभिः कर्तव्यम् । संस्कृतम् एव भारतस्य गौरवं पुनः संस्थापयितुं शक्नोति । संस्कृतानुरागिभिः सर्वैः एव संस्कृतरक्षायाः अस्य प्रसारस्य प्रयासाः सदैव करणीयाः । सः एतस्मिन् कार्ये निरतां संस्कृतभारतीं भृशं प्राशंसत्।

अध्यक्षः बुद्धिबल्लभशास्त्री उपस्थितान् सम्बोधयन् उक्तवान् यत् देशस्य सर्वाः एव भाषाः संस्कृतमयाः सन्ति । सः पंजाबीभाषायाः अनेकान् उदाहरणान् प्रस्तुत्य साधितवान् यत् तस्याः भाषायाः प्रायशः सर्वे एव शब्दाः संस्कृतमूलाः सन्ति ।

शास्त्रिवर्यः खेदं प्राकटयत् यत् वयम् आङ्ग्लजनैः तन्त्रं तु प्राप्तवन्तः परन्तु एतत् तन्त्रम् अस्माकं नास्ति । अस्माकं देशे साम्प्रतम् अपि आङ्ग्लवेशभूषायाः आङ्ग्लभाषायाः वर्चस्वं दृश्यते । अस्माकं व्यवहारे सर्वत्र आङ्ग्लसंस्कृतेः प्रभावः वर्धमानः दृश्यते ,तर्हि कथं वयं स्वतन्त्राः स्मः इति वक्तुं शक्नुमः ।

संस्कृतभाषायाः विश्वकल्याणकारितां प्रतिपादयन् सः उक्तवान् यत् सम्पूर्णविश्वं परिवारभावनया दर्शनस्य प्रेरणा केवलं संस्कृते एव विद्यते । सः उक्तवान् यत् संस्कृतं केवलं भाषा एव नास्ति अपितु एषा जीवनपद्धतिः अस्ति । अत्र शिक्ष्यते यत् जीवने अस्माभिः कथं व्यवहारः करणीयः? कथं महिलाभिः आचरणीयम्? कथम् आत्मनः विश्वस्य अपि हितं चिन्तनीयम् ? सः सर्वान् प्रतिभागिनः निरन्तरं संस्कृतेन सम्भाषितुं प्रेरितवान् ।

इतः पूर्वं स्वप्रास्ताविकं प्रस्तुवन् संस्कृतभारत्याः क्षेत्रसंयोजकः संजीववर्यः उक्तवान् यत् वयं सर्वे स्वेच्छया वर्गे भागं गृहीतवन्तः। संस्कृतमातुः अस्मासु कृपा अस्ति यत् सा अस्मान् एतस्मै पुण्यकार्याय प्रेरितवती । संस्कृतसेवां कुर्वन्तः एव वयं स्वजीवनं धन्यं कर्तुं शक्नुमः । सः कामनां कृतवान् यत् तादृशः समयः आगच्छेत् यदा संस्कृतभाषा अस्य देशस्य जनभाषा भवेत् ।

कार्यक्रमे विश्व-आयुर्वेदपरिषदः क्षेत्रीयसंयोजकः डॉ. प्रेमचन्द शास्त्री, संस्कृत-भारत्याः जनपदसंयोजकः डॉ. निरञ्जनमिश्रः, संस्कृतभारती-हरिद्वारस्य अध्यक्षः गुरुकुल-कांगड़ी-विश्वविद्यालयस्य पूर्वसहायक- कुलसचिवः सुदर्शन - मल्होत्रा ऋषि-संस्कृत-महाविद्यालयस्य प्रबन्धिका, अनेके सन्ताः साधवः अपि समुपस्थिताः आसन् ।

['वाक्' संस्कृतपत्रात् साभारम्]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट संख्या-५, झण्डेवालान, करोल बाग, नई दिल्ली-५

आवश्यक सूचना

अखिल भारतीय नवोदित संस्कृत कवि प्रतियोगिता २००४-२००५

दिल्ली संस्कृत अकादमी द्वारा भारत वर्ष के नवोदित संस्कृत कवियों को प्रोत्साहित करने के उद्देश्य से वर्ष २००४-०५ में गत वर्षों की भांति इस वर्ष भी **अखिल भारतीय नवोदित संस्कृत कवि प्रतियोगिता** का आयोजन किया जा रहा है। एतत् सम्बन्धी निर्धारित आवेदन पत्र तथा नियमों को अकादमी कार्यालय से दिनांक **९ जुलाई २००४** तक प्राप्त कर लें। आवेदन पत्र जमा करने की अन्तिम तिथि **२७ जुलाई २००४** है। आवेदन पत्र डाक द्वारा भी प्राप्त किए जा सकते हैं।

ह./-

(डा. श्रीकृष्ण सेमवाल)

सचिव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

BHARATODAYA
R.N.I. Regd No- UP BIL/1998/1485

भोजनकालिक-जलपाननियमः

- डॉ. व्रजेन्द्रकुमारसिंहदेवः
साहित्य - प्राध्यापकः
गुरुकुलमहाविद्यालयः, ज्वालापुरम् (हरिद्वारम्)

साधारणतया भोजनसमये तृष्णासमये च मनुष्यो जलपानं करोति । जलपानविषये धर्मशास्त्रे नियमः प्रतिपादितः । तत्र जलपानविषये इत्थं वर्णनमस्ति यत्-

१. वामहस्तेन जलपात्रं धृत्वा जलं न पिबेत् ।
२. येन पात्रेण जलं पिबति तत् पात्रं भूमौ न स्थापयेत् ।
३. जलपानकाले जलपात्रे एकहस्तेन जलं न दत्त्वा हस्ताभ्यां जलंदाता जलं प्रददातु ।
४. शूद्रस्तत्परिवेषितस्य जलस्य पानं न कुर्यात् ।

यदुक्तं मनुना -

न पिबेन्न च भुञ्जीत द्विजः समयेन पाणिना ।
नैकहस्तेन च जलं शूद्रेणावर्जितं न वा ॥
पिबतो यत्पतेत् तोयं भाजने मुखनिःसृतम् ।
अभोज्यं तद् भवेदन्नं भोक्ता भुञ्जीत किल्विषम् ॥
उद्धृत्य वामहस्तेन यत् तोयं पिबति द्विजः ।
सुरापानेन तत् तुल्यं मुनिराह प्रजापतिः ॥

अपि चाश्वमेधिके -

पानीयानि पिबेद् यत्र तत्पात्रं द्विजसत्तम ।
अनुच्छिष्टं भवेत् तावद् यावद् भूमौ न निक्षिपेत् ॥

उपर्युक्त-जलपानप्रकारेषु उच्छिष्टेन दक्षिणहस्तेन जलपात्रस्य स्वर्शत्वाद् जलपात्रमपि उच्छिष्टं भवति । यतो हि तस्य जलमपि उच्छिष्टं भवति । उच्छिष्टं जलमपेयमस्ति । अतो जलपात्रस्य पूर्णजलस्यैकत्रैव पेयो विधेयः । एतादृशी व्यवस्था आचार-किरणे स्मृति-सङ्ग्रहे च प्रदत्तास्ति । यथा --

जलपात्रं तु निक्षिप्य मणिबन्धे च दक्षिणे ।
विप्रो भोजनकाले तु पिबेद् वामेन पाणिना ॥

अत्रायं सारः । भोजनसमये वामपाणिना पानीयपात्रं धृत्वा दक्षिणहस्तस्य मणिबन्धे तन्निक्षिप्य जलधाराम् अपि अनवलोकयन्नेव शनैः शनैः जलं पिबेदित्यर्थो नियमः प्रतिपादितः ।

वि.द्र. १. आचार-भूषणम्-पृष्ठसंख्या -२८७-२८८
२. आचारेन्दुः पृष्ठसंख्या - ३२२-३२३
प्रकाशकः- आनन्दाश्रम ग्रन्थावली-१९०८ तथा १९०९
ग्रन्थसंख्या - ५७ तथा ५८

अत्रापि जलपानव्यवस्थाविषये साङ्गोपाङ्गो नियमो वर्तते ।

मुद्रकेण प्रकाशकेन डा. हरिगोपालशास्त्रिणा कनखलस्थे 'गोल्डन टैम्पल आफसेट प्रेस' मुद्रणालये मुद्रापयित्वा 'भारतोदयः' मासिकं मुखपत्रं प्राकाश्यं नीतं हरिद्वारस्थितया ज्वालापुरीयगुरुकुलमहाविद्यालयसभया।
सम्पादकः डॉ. हरिगोपालशास्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu